भागवत लीला चिंतामणि टीका

पेज -3 (4-6) 33X15X0.1 c.m

अथ द्वितीय चरितं प्रकाशयितव्यं स्तत्रादौ श्रीशुकपरीक्षितसंवाद ... ...

आचार्याणाम निरंतरगुरुजप्रतानेयेन नतं धीमहीत्यन्वाय:

76

अथ द्वितीयचरितं प्रकाशयिष्यन् तत्रादौ श्रीशुकपरीक्षित्संवादप्रवृत्तं विराडन्तर्यामिधारणाप्रसंगं ब्रह्मनारद
संवादप्रवृत्तिं अवतारलीलाश्चाह अंवासुदेवं तं परं धीमहि यतोऽस्य परस्य संबंधि[illegible]नोऽस्य प्रश्नद्वैवाच्य
स्य विराड्रूपस्य इतरतोऽन्तर्यामिरूपस्य च अर्थेषु ब्रह्माण्डभेदक्रमसृष्टिसाधनाभुक्तिरूपप्रयोजननिमित्त
धाधारणात्मस्यान्या अभ्यासाः तेषु धाम्ना स्वहृदा मननेनैव अन्वयं संबंधं अतति प्राप्नोतीति अन्वया
त्रयोगी तथा ब्रह्मसुखरूपः स्यात् उपैति शान्तमानंदमानंदमयोऽवसान इत्यादेः यथाजन्मादिमृषा
स्याज्जन्मजरामरणरहितो भवेदित्यर्थः किंच यतः अस्य परस्य त्रिषु भूतभविष्यद्वर्तमानेषु सर्गोऽस्य

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ६

भावित्वेन निश्चयो यस्य स तथोक्तः सृः उत्पत्तिः यः मत्स्याद्यवतारजन्मप्रवाहरूपमृदंभवोऽयो भारहरणा
दि भावहविधानिमित्तं स्यात् यत्र सूरयः सन्ति भवति तेऽविनिमयोऽसुराः शंखहिरण्याक्षादयः मुह्यं
ति देवावेशादिचिन्ता भवन्ति म्रियन्त इति भावः अनेन अकारस्यार्थभूतेन तेन परेण सदा सर्वदा स्वम
र्पितात्मा अभिज्ञः अज्ञो ब्रह्मा निरस्तकुहकं भौमं कं प्रत्यक्तवरदानादिजन्यं सुखं अवारिवारितः एषता
द्रूपं शृणयितुं प्रेरित इत्यर्थः इति यः स्वराड्जः आदिकवये पूर्वं पृष्टः ते श्रीनारदाय आत्तेने उपादि
शदित्यर्थः ६ ॥

2

श्रीकृष्णरूपेण परीक्षित्प्रसंगमाह जन्माद्यस्येति मृदंभुवः स्वराट् सम्राट् यः परीक्षित् अब्रह्मत्वब्राह्मण
तिरस्कारं तेनैव तेन तपस्विनः कंठे सर्पनिधानात्तिरस्कृते अनेन तस्य जन्माद्यस्य ब्राह्मणस्य शृंगि
ऋषिपुत्रस्य अमृषापित्रवज्ञया जातक्रोधदत्तशापेन हेतुना इदातरसाश्रयते गच्छतीति इद्धापेन
तक्षकेन संसतिहिंसति कसिगतिहिंसनयोः भूतसामीप्ये वर्त्तमानः हिंसिष्यति निरस्तकुतर्कभूमंड
लं यथा तथा तत्रत्याः यात् यत्र त्रिसर्गा गंगा अस्तीति शेषः तत्तीरे अवारि एपतावृणोतेर्णिङ् रू
पं प्रायोपवेशं चकार इत्यर्थः आदेः परस्य कवये तस्मै परीक्षिते यद्यद् श्रीकृष्णकाय यंद्रष्टुं विनिमयो य
जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेनेब्रह्महृदाय आदिकवये मुह्यंति य
त्सूरयः तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा धाम्ना स्वेन सदा निरस्तकुहकं
धात्देवाइवस्थिताः सूरयोऽत्रिविद्रिष्टादयोपि स्वेन स्वाभाविकेन धाम्ना तेज सत्यं परं धीमहि ५
साम्यंति व्याग्रा भवंति घ्नत्यितामनयः स्वासनेभ्य इत्यादेः तेनेतियः श्रीकृष्णेन कोकश्री
भागवतश्रवणात् यतोयस्य परस्यार्थेष्वभिज्ञः तत्त्ववित् इतरतः परानंदतन्त्रः दाः दुदान्त कि
ष्महापातासपरीक्षित् कर्मअभिभियोभावंमोदं अवाखिवीकारिनः एपन्नावृणोतेर्णिङ्
रूपं प्रविष्टो ब्रह्मनिर्वाणमभयं दर्शितं त्वयेत्युक्तेः अंवासुदेवं तं परं धीमहीत्यन्वयः ५ इ
ति श्रीभगवल्लीलाचिंतामणौ प्रथमस्कंधार्थादिकुपदर्शनम् ॥ १ ॥ १॥

3

भागो० ४२

दशलक्षणप्रकारप्रसंगमाह आदिकारणं ब्रह्मस्वरेणगुणैश्चमहत्तरंतंपरंहरिंधीमहि यतःपरस्मादे
तोरस्यविराडभिमानिनोब्रह्मणआदिप्रथमंजन्माभूत् यत्र सर्गउक्तः धाम्नास्थानभूतेनभूगोलमयेन
निमयोनिगमनंच वहरनिष्ठादश्च मयगतोधातुः एतेनस्थानमुक्तं यश्चपरःस्वभक्तजनेजातावेकं
प्रह्लादादिषुमहिहिरण्यकशिपुप्रभृतिभिःकृतायांबाधायां अतिशीघ्रंयथातथा आवि आशुपस
गोपूर्वोदव धात्तोर्निनिः तेजस्तेने एतेनपोषणमुक्तं य यस्मात्परस्माच्च अभिजानातीत्यभिज्ञःदे
त्रत्रस्यजीवस्यार्थेषुशुभाशुभादिभोगविषये सूयतेजन्मांतरादनुनयद्यतेऽनयेतिसूः कर्मवासना
जन्मांघस्यतेनेत्यादिनाऊतयश्चोर्थेष्वभिज्ञःस्वराट तेनेब्रह्महृदायआदिकवयेमुह्यंतियत्सूरयः
तेजोवारिमृदांयथाविनिमयोयत्रत्रिसर्गोमृषा धाम्नास्वेनसदानिरस्तकुहकंसत्यंपरंधीमहि १
तस्यारथःप्रवाहःस्वराटस्वतःसिद्धोस्ति एतेनोतिरुक्ता तथाविमृदांशात्रूहंतृणांस्वायंभुवादीनांते
जोभूपालनशक्तिः अन्वयंवंशमनतेगच्छतीत्यन्वयात् त्रिषुभूतादिकालेषुसत्विर्यस्मादेव
भवतीत्यर्थः एतेनमन्वंतरेशानुकथाउक्ताः कस्यजलस्यवयेविस्तारेप्रलयकालीनजलाप्लावे
सतिहतनहरणंचभवति एतेननिरोधउक्तः किञ्च वाशब्दश्चार्थे यत्रपरस्मिन् असन्नभवतीत्य
नसत् विद्यमानं निरस्तकुत्सभोमम प्राकृतं अमृषासत्यंकंमोदसुखंचास्ति तस्फुटं एतेन
मुक्तिरुक्ता आदिब्रह्मधीमहीत्याश्रयउक्तः १ इतिश्रीभगवल्लीलाचिंतामणौद्वितीयस्कंधा

भा० टी०
पू

तृतीयस्कंधचरित्रं वर्णयिष्यंस्तत्रादौ मैत्रेयविदुरसंवादेन सर्गप्रवृत्तिप्रसंगमाह यतः यस्य विदुर
स्य स्वराट् दुर्योधनो धृतराष्ट्रो वा अवृत्तहन्त परविक्रमस्व हृदयस्यासीत् अन्वयश्च विदुरः इत
रतोऽन्यानि तीर्थानि अयात् गतः गतव्यथो यादुत्तमन्यमान इत्युक्तेः कवये विदुषे तस्मै विदु
राय अस्य वासुदेवस्यार्थाः आर्षी लेखु परतत्त्वेष्वभिज्ञः मैत्रेयः यथा अमुह्य संदेहरूपमो
हाभावाय हृदा इत्यत्रत्र आ इति पदं ततश्च तथा ख्यातेनैव तत् उपादिदेशेति तात्पर्यं यथा च पद्या
स्य विश्वस्य जन्म यतो भवति तथा त्रयाणां लोकानां सर्गउत्पादो यस्मात् सः त्रिसर्गः ततश्च

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आ
दिकवये मुह्यन्ति यत्सूरयः तेजोवारिमृदां यथा विनिमयो यत्र त्रिस
र्गोऽमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ८

अजः शिवः ते प्रसिद्धाः सूरयः सनकाद्या मरीच्याद्याश्च तथा अमृषा क्रोधेनोपलक्षिता
विनिमयो देवानभवंतीत्य विनिमयाय यद्द्वारा द सा द्यावा च तथा सदा स्वेन धाम्ना तेजसा अ
निरस्तकुपालितम् लोकं म यथा तथा अस्मित् रात्रुजयी स्वायंभुवश्च भवति तथा
सर्वमातेने श्रीरामरणे सत्यकं परं हृस्फुटं धीमहि ॥ ८ ॥ ॥

दुर्गा
पू

वराहावतारलीलामाह जन्मेति सत्यं परं धीमहि यस्यार्थे हिरण्याक्षस्य सः सती साध्वी माता दितिः इतरतो गमनका
लादन्यत्र संध्यायां कश्यपं प्रजापतिं कश्यपमन्वयात् यतः यस्य हिरण्याक्षहिरण्यकशिपोस्तस्य आदिकवये परस्मै तेने हृत्तं क
विप्रशापमित्यादेः अभिनिर्भयं यथा तथा अमृषा क्रोधेन त्रिसर्गः हिरण्याक्षकुंभकर्णदंतवक्त्रा
नामकं जन्मत्रयमासीत् स्तः परः यस्याहं हृदयदास मित्यादे ब्रह्मणो विधातुः हृदा इच्छामात्रकेन वा

जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकव
येमुह्यंति यत्सूरयः तैजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा धाम्ना
स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि १

पादेन जन्म प्रादुर्भावमनतीति जन्मात् आदि प्रथममेव स्वरं कृत्वा अटतीति स्वराट् स घर्घरस्वरा
द्वं गच्छन् वारिवत्तनयजले अर्थयत् इत्येयः आगतः निः शेषेण अस्ता उत्क्षिप्ता कुः पृथ्वी यस्मिंस्त
द्यथा तथा अस्य हिरण्याक्षस्य मृदां मर्दनं धाम्नादेहेन तदेकदेशेन हस्तेन यस्तथा तेने
यथास्वमात्मा इनः प्रभुर्येषां ते इन्द्रादयस्तैः सह सीदतीति स्वेन सत् अजो ब्रह्मा तेने विनिमयोऽ
न्येदेवाभ्रमंति १ ॥

जा०टी०
६

॥

कपिलावतारलीलामाह अमृषासत्यंअवासुदेवंतंपरंधीमहि वंदे विष्णुंकपिलंवेदगर्भमित्युक्तेः वेदवित्
यःपरः यतोदेवहूत्याहेतोःसृज्जन्मतस्यजन्माद्यस्यपरस्यत्वस्येवार्थेषुतत्त्वेषुविषये तच्छब्दस्यानिर्दिश्य
मानत्वात्तत्त्वंतेनेविस्तारयामास यथाअजोब्रह्मातेविनिमयो देवाअमुह्यंति वोढुंनशक्नुवंति किंपुन
र्वक्तुं किंचयत्रतत्त्वेसतिज्ञानत्वेनविद्यमानेअयंःअमहेतुः त्रयाणांपि× ज्ञानयोगभक्तीनांसर्गःस्व

जन्माद्यस्ययतोन्वयादितरतश्चार्थेष्वभिज्ञःस्वराट् तेनेब्रह्महृदायआ
दिकवयेमुह्यंतियत्सूरयः तेजोवारिमृदांयथाविनिमयोयत्रत्रिस
र्गोमृषाधाम्नास्वेनसदानिरस्तकुहकंसत्यंपरंधीमहि १०

रूपश्चास्ति यतस्तत्त्वादभिज्ञःसर्वज्ञोजीवआदेःपरस्यकंसुखंतस्यवयेविस्तारेसतीतिपदंवा
यत्रवास्वराट्भवतिमुच्यतइत्यर्थः अनुमानुसत्त्वज्ञानाहंनंतरं इतरतःमहद्भिर्देवाःवारिस
मुद्रजलं स्वेनस्वकीयत्वेनधाम्नाआश्रमेणहेतुना अयात्रयो स्तूयमानःसमुद्रेणदत्तार्ह
णनिकेतनइत्युक्तेः ततश्चसतांसांख्याचार्याणामाश्रितंकुहकंअज्ञानंयेनतंधीमहीत्यन्व
यः १० इतिश्रीभगवल्लीलाचिंतामणौतृतीयस्कंधार्थदिग्दर्शनम् ३ ॥ ७ ॥